## ॥ શ્રી જનમંગલસ્તોત્રમ્ ॥

નમોનમઃ શ્રીહરયે બુદ્ધિદાય દયાવતે ।
ભક્તિધર્માઙ્ગજાતાય ભક્તકલ્પદ્રુમાય ચ ॥ ૧ ॥

સુગંધપુષ્પહારાદ્યૈર્વિવિધૈરૂપહારકૈઃ ।
સંપૂજીતાય ભક્તૌઘૈઃ સિતામ્બરધરાય ચ ॥ ૨ ॥

નામ્નામષ્ટોત્તરશતં ચતુર્વર્ગમભીપ્સતામ્ ।
સદ્યઃ ફલપ્રદં નૃણાં તસ્ય વક્ષ્યામિ સત્પતેઃ ॥ ૩ ॥

અસ્ય શ્રી જનમંગલાખ્યસ્ય શ્રી હર્યષ્ટોત્તરશતનામ । સ્તોત્રમંત્રસ્ય શતાનંદ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । ધર્મનંદનઃ શ્રીહરિર્દેવતા । ધાર્મિક ઈતિ બીજમ્ । બૃહદ્વ્રતધર ઈતિ શક્તિઃ । ભક્તિનંદન ઈતિ કીલકમ્ । ચતુર્વર્ગસિદ્ધ્યર્થે જપેવિનિયોગઃ ॥

### । અથ ધ્યાનમ્ ।

વર્ણિવેષ રમણીયદર્શનં મંદહાસરૂચિરાનનામ્બુજમ્ ।
પજિતં સુરનરોત્તમૈર્મુદા ધર્મનંદન મહં વિચિન્તયે ॥ ૪ ॥

શ્રીકૃષ્ણઃ શ્રીવાસુદેવો નરનારાયણઃ પ્રભુઃ ।
ભક્તિધર્માત્મજોઽજન્મા કૃષ્ણો નારાયણો હરિઃ ॥ ૫ ॥

હરિકૃષ્ણો ઘનશ્યામો ધાર્મિકો ભક્તિનંદનઃ ।
બૃહદ્વ્રતધરઃ શુદ્ધો રાધાકૃષ્ણેષ્ટદૈવતઃ ॥ ૬ ॥

મરૂત્સુતપ્રિય કાલીભૈરવાદ્યતિભીષણઃ ।
જિતેન્દ્રિયો જિતાહારઃ તીવ્રવૈરાગ્ય આસ્તિકઃ ॥ ૭ ॥

યોગેશ્વરો યોગકલાપ્રવૃત્તિરતિધૈર્યવાન્ ।
જ્ઞાની પરમહંસશ્ચ તીર્થકૃત્તૈર્થિકાર્ચિતઃ ॥ ૮ ॥

ક્ષમાનિધિઃ સદોન્નિદ્રો ધ્યાનનિષ્ઠસ્તપઃ પ્રિયઃ ।
સિદ્ધેશ્વરઃ સ્વતંત્રશ્ચ બ્રહ્મવિદ્યાપ્રવર્તકઃ ॥ ૯ ॥

પાષંડોચ્છેદનપટુઃ સ્વસ્વરૂપાચલસ્થિતિઃ ।
પ્રશાન્તમૂર્તિર્નિર્દોષોઽસુરગુર્વાદિમોહનઃ ॥ ૧૦ ॥

અતિકારૂણ્યનયન ઉદ્ધવાધ્વપ્રવર્તકઃ ।
મહાવ્રતઃ સાધુશીલઃ સાધુવિપ્રપ્રપૂજકઃ ॥ ૧૧ ॥

અહિંસયજ્ઞપ્રસ્તોતા સાકારબ્રહ્મવર્ણનઃ ।
સ્વામિનારાયણઃ સ્વામી કાલદોષનિવારકઃ ॥ ૧૨ ॥

સચ્છાસ્ત્રવ્યસનઃ સદ્યઃસમાધિસ્થિતિકારકઃ ।
કૃષ્ણાર્ચાસ્થાપનકરઃ કૌલદ્વિટ્ કલિતારકઃ ॥ ૧૩ ॥

પ્રકાશરૂપો નિર્દંભઃ સર્વજીવહિતાવહઃ ।
ભક્તિસંપોષકો વાગ્મી ચતુર્વર્ગફલપ્રદઃ ॥ ૧૪ ॥

નિર્મત્સરો ભક્તવર્મા બુદ્ધિદાતાઽતિપાવનઃ ।
અબુદ્ધિહૃદ્બ્રહ્મધામદર્શકશ્ચાપરાજિતઃ ॥ ૧૫ ॥

આસમુદ્રાન્તસત્કીર્તિઃ શ્રિતસંસૃતિમોચનઃ ।
ઉદારઃ સહજાનંદઃ સાધ્વીધર્મપ્રવર્તકઃ ॥ ૧૬ ॥

કંદર્પદર્પદલનો વૈષ્ણવક્રતુકારકઃ ।
પંચાયતનસન્માનો નૈષ્ઠિકવ્રતપોષકઃ ॥ ૧૭ ॥

પ્રગલ્ભો નિઃસ્પૃહઃ સત્યપ્રતિજ્ઞો ભક્તવત્સલઃ ।
અરોષણો દીર્ઘદર્શી ષડૂર્મિવિજયક્ષમઃ ॥ ૧૮ ॥

નિરહંકૃતિરદ્રોહ ઋજુઃ સર્વોપકારકઃ ।
નિયામકશ્ચોપશમસ્થિતિર્વિનયવાન્ ગુરુઃ ॥ ૧૯ ॥

અજાતવૈરી નિર્લોભો મહાપુરુષ આત્મદઃ ।
અખંડિતાર્ષમર્યાદો વ્યાસસિદ્ધાન્તબોધકઃ ॥ ૨૦ ॥

મનોનિગ્રહયુક્તિજ્ઞો યમદૂતવિમોચકઃ ।
પૂર્ણકામઃ સત્યવાદી ગુણગ્રાહી ગતસ્મયઃ ॥ ૨૧ ॥

સદાચારપ્રિયતરઃ પુણ્યશ્રવણકીર્તનઃ ।
સર્વમંગલસદ્રૂપનાનાગુણવિચેષ્ટિતઃ ॥ ૨૨ ॥

ઇત્યેતત્પરમં સ્તોત્રં જનમંગલસંજ્ઞિતમ્ ।
યઃ પઠેત્તેન પઠિતં ભવેદ્વૈ સર્વમંગલમ્ ॥ ૨૩ ॥

યઃ પઠેચ્છૃણુયાદ્ભક્ત્યા ત્રિકાલં શ્રાવયેચ્ચ વા ।
એતત્તસ્ય તુ પાપાનિ નશ્યેયુઃ કિલ સર્વશઃ ॥ ૨૪ ॥

એતત્સંસેવમાનાનાં પુરુષાર્થ ચતુષ્ટયે ।
દુર્લભં નાસ્તિ કિમપિ હરિકૃષ્ણપ્રસાદતઃ ॥ ૨૫ ॥

ભૂતપ્રેતપિશાચાનાં ડાકિનીબ્રહ્મરાક્ષસામ્ ।
યોગીનીનાં તથા બાલગ્રહાદીનામુપદ્રવઃ ॥ ૨૬ ॥

અભિચારા રિપુકૃતો રોગશ્ચાન્યોપ્યુપદ્રવઃ ।
અયુતાવર્તનાદસ્ય નશ્યત્યેવ ન સંશયઃ ॥ ૨૭ ॥

દશાવૃત્ત્યા પ્રતિદિનમ સ્યાભીષ્ટં સુખં ભવેત્ ।
ગૃહિભિસ્ત્યાગિભિશ્ચાપિ પઠનીયમિદં તતઃ ॥ ૨૮ ॥

ઇતિ શ્રી શતાનંદમુનિવિરચિતં શ્રીજનમંગલાખ્યં શ્રીહરિઅષ્ટોત્તરશતનામસ્તોત્રં સંપૂર્ણમ્ ॥